माण्डूक्योपनिषत्प्राधान्यम्

डा. वि. प्रमीला कुमारी, वरिष्ट व्याख्यात्री वेदान्त विभागः
श्रीशङ्कराचार्य संस्कृतविश्वविद्यालयः कालटि,केरलम्।

मानवसमुदायस्य अतिप्राचीनं महत्वपूर्णं वाङ्मयं भवति वैदिकसाहित्यम्। भारतीयसंस्कारस्य आधारभूतम् अपि तदेव। चत्वारो भवन्ति वेदाः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति। वेदेषु कर्मकाण्डं, उपासनाकाण्डं, ज्ञानकाण्डं चेति विभागत्रयमस्ति। कर्म, उपासना च सांसारिकदशायां, ज्ञानम् तु आध्यात्मिकावस्थायाम्। संसारनिवृत्तिरेव मनुजानां लक्ष्यम्। उपनिषत् ज्ञानप्रतिपादिका भवति। वेदानामन्तिमभागत्वात्, सारभूतत्वात् चेयं वेदान्त इति कथ्यते। अत एव वेदान्तो नाम उपनिषत्प्रमाणमित्युक्तम्।[1] षड्दर्शनानां मध्ये उत्तरमीमांसायाः अपरनामधेयं भवति वेदान्त इति। भौतिकलोकात् विमोचनमेव उपनिषदायां मूलतत्त्वमिति स्वामी विवेकानन्दः वदति। उपनिषत्, ब्रह्मसूत्रं, भगवद्गीता च प्रस्थानत्रयमिति वेदान्तिनः व्यवहरन्ति। संसारबीजभूताविद्यानाशनेन सह ब्रह्मज्ञानरूपमोक्षप्रतिपादनमेव उपनिषदाम् उद्देश्यम्। आत्मविद्या-ब्रह्मविद्या-अध्यात्मविद्या-रहस्यविद्येत्यर्थबोधकं भवति उपनिषत्पदम्।

उप, नि इत्युपसर्गपूर्वक सद् (षद्लृ) धातोः निष्पन्नं भवति उपनिषत्पदम्। सद् धातोः त्रिशरणं (नाशनं), गतिः (प्रापणं), अवसादनं (क्षयः) इति त्रयः अर्थाः सन्ति। अनेन मुमुक्षूणां संसारबीजभूताविद्यानाशनात्परं ब्रह्म गमयतीति गतेः जन्ममरणाद्यावृत्तस्य संसारस्यावसादनेन उपनिषदित्यर्थः। ऐहिकविषयानन्दं स्वर्गप्राप्तिं वा उपनिषदः

विषयो न भवति किंतु परमार्थसत्यं साक्षात्कृत्य संसारबन्धनाद्विमुच्य जीवात्मपरमात्मनोरैक्यं बोधयित्वा निरतिशयानन्दानुभवात्मकतां प्रापयन्ति।

उपनिषदां गणनाकार्ये पण्डितानां मध्येऽपि मतभेदोऽस्ति। सर्वोपनिषदां मध्ये सारमष्टोत्तरशतम् [2] इति वचनेन उपनिषदां संख्या अष्टोत्तरशतमित्युपलभ्यते। ऋग्वेदीयाः दश, शुक्लयजुर्वेदीयाः एकोनविंशतिः, कृष्णयजुर्वेदीयाः द्वात्रिंशत्, सामवेदीयाः षोडश अथर्ववेदीयाः एकत्रिंशत् इति वेदानुसारेण उपनिषत्संख्या सामान्यतो गण्यते। वेदान्ताचार्याः दशोपनिषदामेव भाष्यमकुर्वन्। ईशकेनकठप्रश्नमुण्डकमाण्डूक्यतैत्तिरीयैतरेयछान्दोग्य-बृहदारण्यकाख्याः दशोपनिषदः। दशोपनिषदां मध्ये मन्त्रसंख्यया न्यूनः सुलघुभूतः ग्रन्थः भवति माण्डूक्योपनिषत्। यद्यपि ग्रन्थो लघुः तथापि तत्र प्रतिपाद्यविषयस्तु सर्वव्यापकः। न मे बाला सरस्वती इति वचनवत्। मण्डूकर्षिसंबद्धा भवतीयम्। अनेन कारणेन माण्डूक्योपनिषदिति नाम लब्धम्। माण्डूक्योपनिषदि केवलं द्वादशमन्त्राः सन्ति। द्वादशमन्त्रैः प्रतिपाद्यविषयान् साधारणजनान् बोधयितुं गौडपादाचार्येण आगमवैतथ्याद्वैतालातशान्तिरिति चतुर्षु प्रकरणेषु पञ्चदशाधिकद्विशतकारिकाः रचिताः। तत्र तावदोङ्कारनिर्णयाय प्रथमं प्रकरणम् आगमप्रधानम् आत्मतत्त्वप्रतिपत्युपायभूतम् अस्ति। सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतीतिः यथा तथा द्वैतप्रपञ्चोपशमे अद्वैतप्रतिपत्तिः इति प्रतिपादनाय द्वितीयं प्रकरणं वैतथ्याख्यम्। तथा अद्वैतस्यापि वैतथ्यप्रसङ्गप्राप्तौ युक्तितस्तथार्थदर्शनाय तृतीयं प्रकरणमागमाख्यम्। अद्वैतस्य तथात्वप्रतिपत्तिप्रतिपक्षभूतानि यानि वादान्तराणि अवैदिकानि भवन्ति तेषामन्योन्यविरोधित्वादतथार्थत्वेन तदुपपत्तिभिरेव निराकरणाय चतुर्थम् अलातशान्तिप्रकरणम्।

प्रकरणानां विषयविस्तारस्तु एवमेव। प्रथमप्रकरणे आगमे माण्डूक्योपनिषदः सर्वे मन्त्राः, तेषां व्याख्यानं चोपलभ्यन्ते। अस्य प्रपञ्चस्य तथा जीवकोटीनां चागमनकारणं किमिति विचारणं, तथा स्वमतस्थापनं चात्रकृते । वस्तुतः प्रपञ्चो नास्ति, अस्तीति केवलं भ्रान्तिरेव भवति। रज्ज्वां सर्पारोपे भयं भवति, तस्मिन् क्षणे रज्जुः रज्जुत्वेन अवधियते चेत् तत्र सर्पोऽपि नास्ति, भयमपि नास्ति। स्वाप्नपदार्थाः सर्वे कुतः आगच्छन्ति? कुत्र गच्छन्ति? एतत्सर्वं मिथ्यारूपं भवति। वैतथ्यमित्युक्ते मिथ्येत्यर्थः। स्वप्ने दृश्यमानाः सर्वे पदार्थाः जाग्रदवस्थायां न सन्ति, सर्वमपि मिथ्यैव भवति। वस्तुतः जगदपि मिथ्यैव भवतीति निश्चयः। परिवर्तनविधेयं क्षयशीलं च वस्तु सत्यं न भवति, किन्तु मिथ्यैव। नानारूपेण दृश्यमानं जगत् एकस्मादेव उत्पन्नं भवति। तद्वस्तु निर्गुणं, निराकारं, निरञ्जनं, निश्चलं, सच्चिदानन्दं तदेव ब्रह्म इत्युच्यते। तदेव अद्वैतम्। एवं अद्वैतसिद्धान्तस्थापनं तस्यावगमनं च अद्वैतप्रकरणे भवति। अलातमित्युक्ते अग्निखण्डः इत्यर्थः। एकस्याग्निखण्डस्य शीघ्रातिशीघ्रेण भ्रमणं करोतीति चेत् सुवर्णगोलमिति दृश्यते। किन्तु तदग्निखण्डम् एकत्र स्थाप्यते चेत् सुवर्णगोलं तत्र नास्तीति अवगन्तुं शक्यते। तद्वत् चित्तस्य भ्रमणेन प्रपञ्चस्य भ्रान्तिः चित्तशमनेन ब्रह्मज्ञानमित्येतदेव प्रकरणस्यान्ते वर्ण्यते। तथैवच यथा तत् गोलं केवलं भ्रम एव। वस्तुतस्तु एक एव अग्निखण्डः सत्यं वस्तु, तथा द्वैतादिभेदवादिनां मतं न साधु, अद्वैतमेकमेव साधु।

आत्मनः चतुष्पात्त्वम् अत्र प्रदर्श्यते। साधारणतया चैतन्ये जीवे अनुभवस्त्रिधा भवति - एको जागरिते, अपरः स्वप्ने, तृतीयः स्वस्वरूपावस्थायां सुषुप्तौ इति। एतासां तिसृणामवस्थानाम् अतिशायकः आत्मानुभवः तुरीयो

भवति। जागरितस्थानो विश्वः स्थूलभुक् भवति, स्वप्नस्थानः तैजसः सूक्ष्मभुक् भवति, सुषुप्तिस्थानः प्राज्ञः आनन्दभुक् भवति, चतुर्थस्थानः तुरीयः च। एवमात्मनः चतुष्पात्त्वम्। चतुर्णामपि पादानाम् ओङ्कारस्य अकारादिवर्णानां च परस्परैक्यरूपेण आत्मतत्त्वप्रतिपादनं चास्यामुपनिषदि अस्ति।

सिद्धान्तबिन्दौ अन्तःकरणवासनानिमित्तः इन्द्रियवृत्यभावकालीनार्थोपलम्भः स्वप्न इति स्वप्नलक्षणम्। अत्र किञ्चिद्विचार्यते - स्वप्नेऽनुभूयमानाः गजतुरगादयः पदार्थाः किंलक्षणाः? कस्य कार्यविशेषा एते? इति चिन्तायां केचिन्मानसा एव गजतुरगादयः परिणामाः भवितुमर्हन्ति, ते च तस्यां दशायामविद्यावृत्या अनुभूयन्त इति। अयमेषामाशयः - अत्रायं पुरुषः स्वयंज्योतिर्भवति मुक्तिकोपनिषत्,[३] इति श्रुत्या आत्मनः स्वयंप्रकाशत्वं स्वप्ने एव स्पष्टं भवतीत्यावेद्यते। स्वप्नदशायां च मनोव्यतिरिक्तानां सर्वेषामेवेन्द्रियाणां विलये सति मनसश्च स्वप्नदृश्याकारेण परिणामेऽभ्युपगमे आत्मव्यतिरिक्तस्य प्रकाशकान्तरस्य तदानीमभावात् पारिशेष्यादात्मनः स्वयंप्रकाशत्वं सिद्ध्यति। अथ स्वप्नाध्यासं प्रति किमधिष्ठानमिति विचार्यते। केचित्तु अन्तःकरणावच्छिन्नजीवचैतन्यमित्याहुः। अपरे तु मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमित्याहुः। कः पक्षः श्रेयान् इति चेत् पक्षद्वयमप्युपादेयमिति ब्रूमः। सर्वस्यापि स्वप्नधर्मः जाग्रद्बोधेन निवर्त्यत इत्यनुभवसिद्धम्। संसारदशायां ब्रह्मचैतन्यस्य दुर्लभतया स्वप्नभ्रमनिवृत्तिर्न स्यात्। सम्पन्ने वा ब्रह्मचैतन्यज्ञाने सर्वद्वैतभ्रमनिवृत्तिः सर्वैरनुभूयते। तस्माद्ब्रह्मचैतन्यस्याधिष्ठानत्वं न समञ्जसम्। किञ्च उपनिषदि स्वप्नं प्रकीर्त्य न तत्र रथा न रथयोगा न पन्थानो भवति अथ रथान् रथयोगान् पथः सृजते, न स हि तस्य कर्ता[४] इत्याद्युपनिषद्वाक्यैः

रथाश्वमार्गप्रभृतीनां स्वाप्नार्थानां कर्तृत्वेन जीव एवाभिधीयते। अतश्च जीवचैतन्यस्यैवाधिष्ठानत्वं समुचितम्।

एवं विश्वतैजसप्राज्ञानां त्रयाणामपि पादानां स्थूलसूक्ष्मकारणरूपेण प्रतिपादनं कृतमस्ति। एतासाम् अवस्थानां भेदेऽपि वेदान्तिनः आत्मनः एकत्वमेव स्थापयन्ति। आधिदैविकेन स्थूलरूपेण विराट् वैश्वानरः, सूक्ष्मरूपेण हिरण्यगर्भः तैजसः, कारणरूपेण अन्तर्यामी ईश्वरः च भवति। स्थूलं सूक्ष्मे, सूक्ष्मं कारणे च लीने, कारणरूपेण प्रवर्तमानायाः अविद्यायाः विमोके सति चतुर्थस्य तुरीयस्य साक्षात्कारः संभवति। अथ चतुर्थं तुरीयं पादं वर्णयति नान्तःप्रज्ञं..... इति। अत्र निषेधमुखेनैव तुरीयस्य प्रतिपादनं, न विधिमुखेन। न च एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु इत्यमृतबिन्दूपनिषद्वचनविरोधः। जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चो यत्प्रकाशते इति कैवल्योपनिषदि आदिपदेन तस्याभिधानम्।

सुबालोपनिषदि योऽयं विज्ञानमय उत्क्रामात् प्राणं वहती त्युपक्रम्य जागरितं, स्वप्नं, सुषुप्तं, तुरीयं चेति तुरीयपदेनावस्थान्ताराभिधानात्। जाग्रत्स्वप्नस्सुषुप्तिस्तुरीयमिति चतुर्विधाः अवस्था इति शारीरकोपनिषदि स्पष्टमेवावस्थाचातुर्विध्यस्योक्तत्वाच्च।

नान्तःप्रज्ञ मित्यादिना अन्तःप्रज्ञत्वादिस्थानिधर्मप्रतिषेधः कृतः। प्रपञ्चोपशममिति जाग्रदादिस्थानधर्मप्रतिषेधः क्रियते। अत एव शान्तमविक्रियं निर्विशेषं शिवं सुखात्मकमद्वैतं भेदकल्पनावर्जितं चतुर्थं तुरीयं मन्यन्ते, प्रतीयमानपादत्रयरूपवैलक्षण्यात्। यथा शङ्करभगवत्पादप्रणीतायां दशश्लोक्याम् अष्टमश्लोकः -

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-

र्न विश्वो न वा तैजसः प्राज्ञको वा।

अविद्यात्मकत्वात् त्रयाणां तुरीय-

स्तदेकोऽवशिष्टः शिवः केवलोऽहम्।। इति।

आत्मनः चतुष्पात्त्वमुपपाद्य ओङ्कारमात्राविभागं च कृत्वा पादा मात्रा मात्राश्च पादा इति परस्परैक्यं चोक्तम्। आत्मनः पादभूतानां विश्वादीनां, ओङ्कारस्य अकारादिरूपाणां मात्राणां च एकीकरणात्, एकेनैव प्रयत्नेन नामरूपात्मकस्य प्रपञ्चस्य उत्तरोत्तरप्रविलयनेन तुरीयस्य केवलस्यात्मनः प्रतिपत्तिर्भवतीति भावः। तथा जागरितस्थानो वैश्वानरः ओङ्कारस्य प्रथमा मात्रा अकारो आप्तेरादिमत्त्वाच्च। आप्तिः व्याप्तिः, अकारेण सर्वा वाक् व्याप्ता। अकारो वै सर्वा वाक् [५] इति श्रुतेः। तथा वैश्वानरेण जगत् व्याप्तं च - तस्य ह वा एतस्य ..... इति श्रुतेः। आदिरस्य विद्यते इत्यादिमत्। तथैव वैश्वानरोऽपि। एतस्माद्वा सामान्यात् अकारत्वं वैश्वानरस्य। स्वप्नस्थानस्तैजसः ओङ्कारस्य उकारो द्वितीया मात्रा उत्कर्षात् उभयत्वाच्च। अकारादुत्कृष्टः उकारः तथा विश्वादुत्कृष्टः तैजसः अकारमकारयोर्मध्यस्थः उकारः, तथा विश्वप्राज्ञयोर्मध्यस्थः तैजसः। एवमुत्कर्षोभयत्वसामान्यात् तयोरैक्यम्। सुषुप्तस्थानः प्राज्ञः ओङ्कारस्य तृतीयमात्रा, मितेरपीतेर्वा इति। मानं प्रलयोत्पत्योः प्रवेशनिर्गमाभ्यां विश्वतैजसौ प्राज्ञेन मीयेतेति प्रस्थेनव यवाः तथा ओङ्कारे समाप्तौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इवाकारोकारौ मकारे। अपीतिरप्यय एकीभावः। ओङ्कारोच्चारणे अन्त्येऽक्षर एकीभूताविव अकारोकारौ, तथा विश्वतैजसौ सुषुप्तकाले प्राज्ञे।

अतः सामान्यादेकत्वं प्राज्ञमकारयोः। अपीतिश्च जगत्कारणात्मा च भवति - अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोद्वैतः ओङ्कार आत्मैव। मात्रा यस्य नास्ति सोऽमात्रः ओङ्कार; चतुर्थस्तुरीय आत्मैव। अभिधानाभिधेयरूपयोः वाङ्मनसोः क्षीणितत्त्वादव्यहार्यः। प्रपञ्चोपशमः अत एव शिवः सुखात्मकः अद्वैतभेदकल्पनारहितः। एवमोङ्कारः आत्मैव। य एवं वेद सः स्वं पारमार्थिकमात्मानं स्वेनैव संविशति। परमार्थदर्शी ब्रह्मवित् सः बीजभावं दग्ध्वा आत्मानं प्रविष्ट इति न पुनर्जायते।

मनुजेन प्रतिदिनमनुभूयमानाः इमाः तिस्रः जाग्रत्स्वप्नसुषुप्तिरूपाः अवस्थाः। चतुर्थावस्था तु एताः अतिशेते। एतासां दार्शनिकरीत्या विशकलनमेव माण्डूक्योपनिषदि क्रियते। पादा मात्रा मात्राश्च पादा इति पादचतुष्टयस्य, ओङ्कारस्य मात्राचतुष्टयस्य च तुलनमपि क्रियते। एवं एतेषामनुभवानामोङ्कार एव आत्मा इति सिद्ध्यति।

उपनिषदां मध्ये माण्डूक्योपनिषदः अत्यन्तं प्राधान्यमस्ति। इयं शरीरेण अत्यन्तं लघ्वी भवति। अपि च वेदान्तेषु चत्वारि महावाक्यानि सन्ति। तेष्वेकं वाक्यं 'अयमात्मा ब्रह्म' अस्यामुपनिषदि अन्तर्भवति। अनेन कारणेन इयं लघुतमापि महत्तां प्राप्नोति। तथैव इतरोपनिषदपेक्षया मङ्गलद्वयेनैवारभ्यत इत्यतः इतरविलक्षणा भवति। सर्वोपनिषदां चूडामणिः भवति माण्डूक्योपनिषत्। मुक्तिकोपनिषदि एवमुच्यते - मोक्षेच्छूनाम् उपनिषद्भवति माण्डूक्योपनिष दिति। अत एवोक्तं भवति लौकिकैः माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये इति। श्रीशङ्कराचार्येण अपि वेदान्तार्थसारसंग्रहभूतम् इति वाक्येनैव तस्य भाष्यमारभ्यते। भाष्यकर्तृमनस्यपि एवं चिन्तयेच्चेत् अस्याः प्राधान्यं

कियत्पर्यन्तमिति ऊहनीयमेव। अपि च भाष्यकारेण श्रीशङ्करभगवत्पादेन माण्डूक्योपनिषत्प्रमाणीकृत्यैव स्वमतं स्थाप्यत इत्यतोऽपि उपनिषत्सु माण्डूक्यस्य प्राधान्यं सुविदितमेव। तथैव मन्त्रः, मन्त्रस्य भाष्यं ततः कारिका, कारिकायाः भाष्यं च द्रष्टुं शक्यते। अन्यत्र कुत्रापि एतादृशरीत्या व्याख्यानं द्रष्टुं न शक्यते। अतः अपि अस्याः प्राधान्यं महत्तरमेवेति अकथनेनापि ज्ञातुं शक्यते।

वस्तुतः अस्माभिः सर्वैरपि प्रतिदिनमनुभूयमानम् अवस्थात्रयं ललितकोमलपदावल्या अत्र प्रतिपादितमित्यपि अस्याः वैशिष्ट्यमेव। यद्यपि सर्वासु उपनिषत्सु जीवब्रह्मैक्यप्रतिपादनमेव विषयः, तथा एतद्भिन्नोपनिषत्सु ऐक्यप्रतिपादनकाले तदङ्गभूतभौतिकपदार्थानां बहुविधारोपो दृश्यते।

अत्र तु भौतिकवस्तूनां विचारं विना केवलं जीवाभिन्नब्रह्मप्रतिपादनशैली अतीव सुबोधा, सरला, सरसा चेति, एवंप्रकारेण यद्यत्रचिन्त्यते चेत् नितरामस्यां उपनिषदि विशेषमहत्ता अस्तीति अनुभवामः।

सन्दर्भाः

१. वेदान्तसारः

२. मुक्तिकोपनिषत्, ४४.

३. बृहदारण्यकोपनिषत्, ४/३/९.

४. तत्रैव ४/२/२०.

५. ऐतरेयोपनिषत्, २/६/७

ग्रन्थसूची

१. गौडपादीयकारिकासहिता, अथर्ववेदीयमाण्डूक्योपनिषत्, आनन्दगिरिसंस्कृतटीका-

संवलितशाङ्करभाष्यसमेता आनन्दाश्रमसंस्कृतग्रन्थावली।

२. एकादशोपनिषत्, मोतीलाल् बनारसी दास्।

३. सिद्धान्तबिन्दुः, मधुसूदनसरस्वतिकृतः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

४. वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रः।

५. मुक्तिकोपनिषत्।

६. उपनिषत्सर्वस्व डि. श्रीमान् नम्पूतिरी